योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०७२

द्विसप्ततितमः सर्गः ७२

श्रीवसिष्ठ उवाच ।

सूची सा संभवद्वाणी चिन्तयित्वेत्यकम्पनम् ।

पुनस्तद्देहलाभाय भवाम्याशु तपस्विनी ।। १

इति संचिन्त्य चित्तस्थं संहृत्य जनमारणम् ।

तदेव हिमवच्छृङ्गं जगाम तपसे स्थितम् ।। २

अपश्यदेव सूचित्वं सा तन्मानसमात्मनि ।

प्राणवातात्मिका प्राणैः प्रविश्य हृतमानसम् ।। ३

अथात्मन्येव सूचित्वं पश्यत्येव मनोमयम् ।

प्राणवातशरीरासौ जगाम हिमवच्छिरः ।। ४

दृढदावानले तत्र सर्वभूतविवर्जिते ।

महामहाशिलाभाभारूक्षे पांसुविधूसरे ।। ५

तस्थावभ्युदितेवासौ निस्तृणे विपुले स्थले ।

मरावकस्मात्संजातशुष्का तृणशिखा यथा ।। ६

सुसूक्ष्मस्यैकपादस्य सार्धेनैवाश्रितोर्वरा ।

स्वसंविदेकपादात्म तपः कर्तुं प्रचक्रमे ।। ७

सूक्ष्मपादतलेनैषा वसुधारेणुसंकटी ।

निवार्य त्रिपदीं कृत्स्नाद्यत्नेनोर्ध्वमुखी स्थिता ।। ८

कृष्णत्वहिंस्रतातैक्ष्ण्यव्याप्तास्यपवनाशनैः ।

यत्नात्पदं निबध्नन्ती रेण्वणूपलसंकटे ।। ९

अरण्ये क्षुभिता संपद्दूरालोकार्थमुत्थिताम् ।

पुच्छाकोटिस्थितां वातालोलामनुचकार सा ।। 3.72.१०

मुखरन्ध्रविनिष्क्रान्ता तस्या भास्करदीधितिः ।

सखी बभूव सूच्याभा पश्चाद्भागैकरक्षिणी ।। ११

क्षुद्रेऽपि स्वजने भूतेऽप्येति वत्सलतां जनः ।

दीधित्यापि सखीवृत्तं सूच्यां शुचितया भृतम् ।। १२

बभूव तस्याः स्वच्छाया द्वितीया तापसी सखी ।

एवं सूचीव मलिना तया पश्चात्कृतेव सा ।। १३

सूच्या तया सुनिर्गत्य सुपाताक्ष्या स्म कूणितैः ।

पश्चात्सख्याभया साधुरन्योन्याचारकेवलम् ।। १४

सूच्याभिप्रेक्षिते याता मतिं द्रुमलतादयः ।

महातपस्विनीं सूचीं दृष्ट्वा नोत्कण्ठयन्ति के ।। १५

स्थिरबद्धपदामेनां स्वमनोवृत्तिमुत्थिताम् ।

अनिलं भोजयांचक्रुर्मुखनिर्गतभांकृतैः ।। १६

प्रसूतानि भविष्याणि गीर्वाणान्यानि वा चिरम् ।

कौसुमानि रजांस्यस्या इत्यास्यं पर्यपूरयन् ।। १७

ततो महेन्द्रप्रहितं वातनुन्नामिषं रजः ।

तया त्वभ्रत्वव्याजेन न निगीर्णं मुखे विशत् ।। १८

न निगीर्णवती तानि रजांसि दृढनिश्चयात् ।

अन्तःसारतया कार्यं लघवोऽप्याप्नुवन्ति हि ।। १९

न पिबत्यास्यसंस्थानि तथा पुष्परजांस्यपि ।

विस्मयं पवनः प्राप सुमेरून्मूलनाधिकम् ।। 3.72.२०

आशिरः पिहिता पङ्कैः पूरितापि महाजलैः ।

विधूतापि बृहद्वातैर्दग्धापि वनवह्निभिः ।। २१

भिन्नापि करकापातेर्भ्रामितापि तडिद्भ्रमैः ।

उद्वेजितापि जलदैः क्षोभिताप्यतिगर्जितैः ।। २२

अपि वर्षसहस्रैः सा चित्तस्थदृढनिश्चया ।

पादाग्रं तु कुसुप्तेव नाकम्पत तपस्विनी ।। २३

निवृत्ताया बहिःस्पन्दाद्देशकाले बहौ गते ।

विचारयन्त्यास्तस्याः स्वमात्मा सत्यं सुचेतनम् ।। २४

ज्ञानालोकः समुदभूत्सा परावरदर्शिनी ।

बभूव निर्मला सूचिर्विषूची पावनं परम् ।। २५

जाता विदितवेद्या सा स्वयमेव तया धिया ।

तपसा दुष्कृते क्षीणे सूची स्वसुखसूचिनी ।। २६

इति वर्षसहस्राणि साकरोद्दारुणं तपः ।

सप्तसप्तमहालोकसंतापकरमुन्मुखी ।। २७

तस्याः कल्पाग्निभीमेन तपसा हि महागिरिः ।

बभूव तेन ज्वलितो जज्वालेव ततो जगत् ।। २८

कस्येदं तपसाक्रान्तं जगदित्यथ वासवः ।

नारदं परिपप्रच्छ स तस्याकथयच्च तत् ।। २९

सप्तवर्षसहस्राणि सूची दीर्घतपस्विनी ।

महाविज्ञानदेहासौ तेनेदं ज्वलितं जगत् ।। 3.72.३०

नागाः श्वसन्ति विचलन्ति नगाः पतन्ति

वैमानिका जलधिवारिधराः प्रयान्ति ।

शोषं दिशोऽर्कसहिता मलिनीभवन्ति

सूच्याः सुरेन्द्र तपसा क्षयमाययेव ।। ३१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे क० सूचीतपःप्रभावो नाम द्विसप्ततितमः सर्गः ।। ७२ ।।